# बोर्ड कृतिपत्रिका: मार्च 2023

**Time: 2 Hours** **Marks: 40**

**सूचना:**

(1) सूचनानुसारेण आकृतय: आरेखितव्या:।


(2) आकृतीनाम् आरेखनं मसीलेखन्या कर्तव्यम्।

(3) सर्वासु कृतिषु वाक्यानां पुनर्लेखनम् आवश्यकम्।


(4) लेखनं सुवाच्यं, स्पष्टं लेखननियमानुसारं च भवेत्।

## प्रथम: विभाग: – सुगमसंस्कृतम् (6)

**1. (अ) चित्रं दृष्ट्वा नामानि लिखत। (4 त: 3)** **[3]**

(1) 

(2) 

(3) 

(4) 


**(आ) सङ्ख्या: अक्षरै:/अङ्कै: लिखत। (3 त: 2)** **[2]**

(1) ३० (2) नव (3) ७१

**(इ) समय-स्तम्भमेलनं कुरुत।** **[1]**

| ‘अ’ | ‘आ’ |
|---|---|
| (1) पञ्चवादनम् | ६.३० |
| (2) सपाद अष्टवादनम् | ५.०० |
| | ८.१५ |

## द्वितीय: विभाग: – गद्यम् (14)

**2. (अ) गद्यांशं पठित्वा निर्दिष्टा: कृती: कुरुत।** **[4]**

अस्ति एकं चम्पकं नाम अरण्यम्। अरण्ये चित्राङ्गो नाम मृग: एकाक्षो नाम काकश्च स्नेहेन निवसत: स्म। एकदा चित्राङ्ग: वने भ्रमन् केनापि शृगालेन अवलोकित:। क्षुद्रबुद्धि: नाम स: शृगाल: स्वार्थहेतुना मृगेण सह मित्रताम् ऐच्छत्। अस्तङ्गते सवितरि क्षुद्रबुद्धि: मृगेण सह मृगस्य निवासस्थानं गत:। मृगशृगालौ दृष्ट्वा काकोऽवदत्, “सखे चित्राङ्ग! कोऽयं द्वितीय:?” मृग: अब्रूत, “जम्बूकोऽयम्। अस्मत्सख्यम् इच्छति।” काक: उपादिशत्, “अकस्मादागन्तुना सह मित्रता न युक्ता।” तदाकर्ण्य जम्बूक: सकोपम् आह, “मृगस्य प्रथमदर्शने भवानपि अपरिचित: एव आसीत्। यथायं मृग: मम बन्धु: तथा भवानपि।” मृग: अब्रवीत्, “अलं विवादेन। वयं सर्वे आनन्देन एकत्र निवसाम:।” काकेनोक्तम् “एवमस्तु।”

**(1) अवबोधनम्। (3 तः 2)** **2**

**(क) उचितं कारणं चित्वा वाक्यं पुनर्लिखत।** 1

शृगालः मृगेण सह सख्यम् इच्छति यतः ________ ।

(1) शृगालः मृगमांसं खादितुम् इच्छति।

(2) शृगालः मृगे स्निह्यति।

**(ख) कः कं वदति?** 1

"अकस्मादागन्तुना सह मित्रता न युक्ता"

**(ग) पूर्णवाक्येन उत्तरं लिखत।** 1

अरण्ये कौ निवसतः स्म?

**(2) शब्दज्ञानम्। (3 तः 2)** **2**

**(क) गद्यांशात् 2 प्रथमाविभक्त्यन्तपदे चित्वा लिखत।** 1

**(ख) गद्यांशात् विशेषण-विशेष्ययोः मेलनं कुरुत।** 1

| | 'अ' | 'आ' |
|---|---|---|
| (1) | भ्रमन् | एकाक्षः |
| (2) | अस्तङ्गते | चित्राङ्गः |
| | | सवितरि |

**(ग) पूर्वपदं / उत्तरपदं लिखत।** 1

(1) केनापि = केन + ............... ।

(2) जम्बूकोऽयम् = ............... + अयम्।

**(आ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत।** **[4]**

(अर्णवः जपाकुसुमं गृहीत्वा प्रविशति। तस्य पिता विज्ञानस्य प्राध्यापकः। सः पुस्तकपठने मग्नः। तस्य पार्श्वे उत्पीठिकायां सूक्ष्मेक्षिका वर्तते।)

अर्णवः – पितः, अस्माकम् उद्यानाद् जपाकुसुमम् आनीतं मया। कियन्तः सूक्ष्माः तस्य परागकणाः।

पिता – सूक्ष्मेक्षिकया पश्य, तेषां कणानां रचनाम् अपि द्रष्टुं शक्नोषि! (अर्णवः तथा करोति।)

पिता – किं दृष्टं त्वया?

अर्णवः – पितः, अद्भुतम् एतत्। अत्र परागकणस्य सूक्ष्माणि अङ्गानि दृश्यन्ते।

पिता – अर्णव, एतानि परागकणानाम् अङ्गानि त्वं सूक्ष्मेक्षिकया द्रष्टुं शक्नोषि। परन्तु एतद् विश्वं परमाणुभ्यः निर्मितम्। ते परमाणवः तु सूक्ष्मेक्षिकया अपि न दृश्यन्ते।

अर्णवः – परमाणुः नाम किम्?

पिता – अस्तु। कथयामि। मुष्टिमात्रान् तण्डुलान् महानसतः आनय।

अर्णवः – (तथेति उक्त्वा पाकगृहात् तण्डुलान् आनयति।) स्वीकरोतु, तात।

**(1) अवबोधनम्। (3 तः 2)** **2**

**(क) उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत।** 1

(1) एतद् विश्वं ............... निर्मितम्। (तण्डुलेभ्यः/परमाणुभ्यः)


(2) अर्णवः उद्यानात् ............... गृहीत्वा प्रविशति। (कमलं/जपाकुसुमं)

**(ख) वाक्यं पुनर्लिखित्वा सत्यम्/असत्यम् इति लिखत।** 1

परमाणवः सूक्ष्मेक्षिकया दृश्यन्ते।

**(ग) एषः गद्यांशः कस्मात् पाठात् उद्धृतः?** 1

(2) **प्रवाहि जालं पूरयत।** **2**




(तण्डुलान् आनयति।, सूक्ष्मेक्षिकया पश्यति।, जपाकुसुमं गृहीत्वा प्रविशति।, परमाणुविषये पृच्छति।)

**(इ) गद्यांशं पठित्वा सरलार्थं लिखत। (2 तः 1)** **[4]**

(1)

वैखानसः – (राजानम् अवरुध्य) राजन्। आश्रममृगोऽयं, न हन्तव्यः, न हन्तव्यः। आशु प्रतिसंहर सायकम्। राज्ञां शस्त्रम् आर्तत्राणाय भवति न तु अनागसि प्रहर्तुम्।

दुष्यन्तः – प्रतिसंहृत एषः सायकः। (यथोक्तं करोति।)

(2)

श्रोतृवृन्दः – नदीपूजनम्? किमर्थं नदीपूजनम्?

कीर्तनकारः – नदी खलु जीवनदायिनी। अतः अस्मिन्नवसरे कृतज्ञतां प्रदर्शयितुं जनाः जले दीपदानं कुर्वन्ति। द्रोणे दीपं प्रज्वाल्य नदीजले समर्पयन्ति।

**(ई) माध्यमभाषया उत्तरं लिखत। (2 तः 1)** **[2]**

(1) धरित्र्याः उपदेशं मनसि निधाय पृथुवैन्यः किं किम् अकरोत्?

(2) शक्रस्य कपटं विशदीकुरुत।

## तृतीयः विभागः- पद्यम्। **(10)**

**3. (अ) पद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत। (5 तः 4)** **[4]**

निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु
लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम्।
अद्यैव वा मरणमस्तु युगान्तरे वा
न्याय्यात्पथः प्रविचलन्ति पदं न धीराः।।

अयं न भक्तो न च पूजको वा
घण्टां स्वयं नादयते तथापि।
धनं जनेभ्यः किल याचतेऽयम्
न याचको वा न च निर्धनो वा।।

यत्र विद्वज्जनो नास्ति श्लाघ्यस्तत्राल्पधीरपि।
निरस्तपादपे देशे एरण्डोऽपि द्रुमायते।।

**(क) पूर्णवाक्येन उत्तरं लिखत।** 1

न्याय्यात्पथः के न विचलन्ति?

(ख) **विशेषण-विशेष्ययोः मेलनं कुरुत।** 1

| | 'अ' | 'आ' |
|---|---|---|
| (1) | निरस्तपादपे | विद्वज्जनः |
| (2) | श्लाघ्यः | देशे |
| | | अल्पधीः |

(ग) **जालरेखाचित्रं पूरयत।** 1

लोकयानवाहकः

न ____________ | न ____________

(घ) **पद्यांशात् २ द्वितीया-विभक्त्यन्तपदे चित्वा लिखत।** 1

(च) **पूर्वपदं लिखत।** 1

(1) अद्यैव = ........................ + एव।

(2) याचतेऽयम् = ........................ + अयम्।

(आ) **पद्ये शुद्धे पूर्णे च लिखत। (3 तः 2)** **4**

(1) घटं भिन्द्यात् .................................................. ।
.......................................................... भवेत्।।

(2) यादृशं वपते .................................................. ।
.......................................................... फलम्।।

(3) वैद्यराज .................................................. ।
.......................................................... धनानि च।।

(इ) **माध्यमभाषया सरलार्थं लिखत। (2 तः 1)** **2**

(1) अद्ययावद्धि ज्ञानाय वृत्तपत्रं पठेत्सदा।
सर्वविधसुविद्यार्थं वाचनमुपकारकम्।।

(2) षड्जमूला यथा सर्वे सङ्गीते विविधाः स्वराः।
तथा मानवताधर्मं सर्वे धर्माः समाश्रिताः।।

## चतुर्थः विभागः- भाषाभ्यासः। **(10)**

4. (अ) **पृथक्करणम्।** **4**

(1) **मञ्जूषातः नामानि सर्वनामानि च पृथक्कुरुत। (5 तः 4)** 2

| नाम | सर्वनाम |
|---|---|
| | |

(**मञ्जूषा** – मम, राजा, सः, नदी, एतस्मिन्)

(2) **मञ्जूषातः क्रियापदानि धातुसाधित-विशेषणानि च पृथक्कुरुत। (5 तः 4)** 2

| क्रियापदम् | धातुसाधित-विशेषणम् |
|---|---|
| | |

(**मञ्जूषा** – अकथयत्, मुक्तः, जानाति, भेतव्यम्, वहतु)

**(आ) निर्दिष्टाः कृतीः कुरुत। (4 तः 2)** **4**

**(1) सङ्ख्या / क्रम / आवृत्तिवाचकस्य योग्यं पर्यायं चित्वा वाक्यं पुनर्लिखत। (3 तः 2)** 2

(क) .................................... वेदाः वर्तन्ते। (चत्वारि/चत्वारः)

(ख) श्रीकृष्णः देवक्याः ...................... अपत्यम्। (अष्टमम्/अष्टः)

(ग) अहम् एकं पाठं ...................... सम्यक् पठामि। (द्विवारं/द्वौ)

**(2) समासविग्रहाणां समासनामभिः सह मेलनं कुरुत। (6 तः 4)** 2

| समासविग्रहः | समासनाम |
|---|---|
| (1) किञ्चित् जानाति इति। | षष्ठी-तत्पुरुषः। |
| (2) जलस्य व्यवस्थापनम्। | कर्मधारयः। |
| (3) लगुडः हस्ते यस्य सः। | उपपद - तत्पुरुषः। |
| (4) कवयः च पण्डिताः च। | अव्ययीभावः। |
| (5) अहनि अहनि। | बहुव्रीहिः। |
| (6) मानवता एव धर्मः। | इतरेतर-द्वन्द्वः। |

**(3) मञ्जूषातः समानार्थकशब्दान्/विरुद्धार्थकशब्दान् चित्वा लिखत।** 2

(**मञ्जूषा** – सुवर्णम्, निन्दा, असत्यम्, मकरः)

(1) नक्रः = ..........................। (2) स्तुतिः × ..........................।

(3) कनकम् = ..........................। (4) सत्यम् × ..........................।

**(4) योग्यं पर्यायं चिनुत। (3 तः 2)** 2

(1) पृथुभूपेन धनुः सज्जीकृतम्। (कर्तृवाच्यम्/कर्मवाच्यम्)

(2) त्वं द्रष्टुं ................... । (शक्नोषि/शक्नोति)

(3) वानराः ................... फलानि खादन्ति। (मधुराणि/मधुराः)

**(इ) विशिष्ट-विभक्तेः उपयोगं कृत्वा वाक्यनिर्माणं कुरुत। (4 तः 2)** **2**

(क) कथ् (10 उ.प.) (ख) अलम्

(ग) स्निह् (4 प.प.) (घ) कृते